श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये अष्टसप्ततितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये अष्टसप्ततितमं दशकम् ॥

## रुक्मिणीस्वयंवरम्

त्रिदशवर्धकिवर्धितकौशलं
त्रिदशदत्तसमस्तविभूतिमत्।
जलधिमध्यगतं त्वमभूषयो
नवपुरं वपुरञ्चितरोचिषा ॥ 78.1 ॥

ददुषि रेवतभूभृति रेवतीं
हलभृते तनयां विधिशासनात्।
महितमुत्सवघोषमपूपुषः
समुदितैर्मुदितैः सह यादवैः ॥ 78.2 ॥

अथ विदर्भसुतां खलु रुक्मिणीं
प्रणयिनीं त्वयि देव सहोदरः।
स्वयमदित्सत चेदिमहीभुजे
स्वतमसा तमसाधुमुपाश्रयन् ॥ 78.3 ॥

चिरधृतप्रणया त्वयि बालिका
सपदि काङ्क्षितभङ्गसमाकुला।
तव निवेदयितुं द्विजमादिशत्
स्वकदनं कदनङ्गविनिर्मितम् ॥ 78.4 ॥

द्विजसुतोऽपि च तूर्णमुपाययौ
तव पुरं हि दुराशदुरासदम्।

मुदमवाप च सादरपूजितः
स भवता भवतापहृता स्वयम् ॥ 78.5 ॥

स च भवन्तमवोचत कुण्डिने
नृपसुता खलु राजति रुक्मिणी ।
त्वयि समुत्सुकया निजधीरता -
रहितया हि तया प्रहितोऽस्म्यहम् ॥ 78.6 ॥

तव हृताऽस्मि पुरैव गुणैरहं
हरति मां किल चेदिनृपोऽधुना ।
अयि कृपालय पालय मामिति
प्रजगदे जगदेकपते तया ॥ 78.7 ॥

अशरणां यदि मां त्वमुपेक्षसे
सपदि जीवितमेव जहाम्यहम् ।
इति गिरा सुतनोरतनोद्भृशं
सुहृदयं हृदयं तव कातरम् ॥ 78.8 ॥

अकथयस्त्वमथैनमये सखे
तदधिका मम मन्मथवेदना ।
नृपसमक्षमुपेत्य हराम्यहं
तदयि तां दयितामसितेक्षणाम् ॥ 78.9 ॥

प्रमुदितेन च तेन समं तदा
रथगतो लघु कुण्डिनमेयिवान् ।
गुरुमरुत्पुरनायक मे भवान्
वितनुतां तनुतामखिलापदाम् ॥ 78.10 ॥

॥ इति श्रीमन्नारायणीये अष्टसप्ततितमं दशकं समाप्तम् ॥